इति हारावली । १८७ ॥ अस्य गुणाः । गुरुत्वम् । ग्राहित्वम् । मधुरत्वम् । बलवर्द्धनत्वम् । मेदःपित्तास्रनाशित्वम् । वृष्यत्वम् । रोचनत्वम् । कफवातकारित्वञ्च । इति राजवल्लभः ॥ (जलपानविधौ भक्षणनिषेधोऽस्य यथा,—

"प्रातः पानीयपाने मद्यकृधिगणितं द्रव्यमेतच्च नाद्यात् ।
मांसं क्षीरञ्च शाकं सकलविदलकं पिष्टकं चिङ्गटञ्च ॥"

इति वैद्यक-ऋतुचर्य्यायाम् ॥)

चिङ्गटी, स्त्री, (चिङ्गट + जातौ ङीष् ।) मत्स्यविशेषः । घुषाचिङ्गड़ी इति भाषा ॥ अस्या गुणाः । मधुरत्वम् । हृद्यत्वम् । वातनाशित्वम् । श्लेष्मकारित्वम् । गुरुत्वञ्च । इति राजवल्लभः ॥

चिङ्गड़ः, पुं, (चिङ्गट + पृषोदरादित्वात् टस्य डत्वे साधुः ।) चिङ्गटमत्स्यः । इति शब्दमाला ॥ (विवरणमस्य चिङ्गटशब्दे व्याख्यातम् ॥)

चिचिण्डः, पुं, फलविशेषः । चिचिण्डा इति चिचिङ्गा इति च भाषा ॥ तत्पर्य्यायः । श्वेतराजिः २ सुदीर्घः ३ गृहकूलकः ४ । अस्य गुणाः । वातपित्तनाशित्वम् । पथ्यत्वम् । बलरुचिकारित्वम् । शोषिणोऽतिहितत्वम् । पटोलतः किञ्चिद्गुणहीनत्वञ्च । इति भावप्रकाशः ॥ (यथा च हारीते प्रथमे स्थाने दशमेऽध्याये ।

"चिचिण्डो वातपित्तघ्नो बल्यः पथ्यो रुचिप्रदः ।
शोषिणोऽतिहितः किञ्चिद्गुणैर्न्यूनः पटोलतः ॥")

चिञ्चा, स्त्री, (चिं चयनं चिनोतीति । चि + अन्येभ्योऽपीति डः ।) तिन्तिड़ीवृक्षः । इत्यमरः । २ । ४ । ४३ ॥ (यथा,—

"चिञ्चादलरसश्चात्र पथ्यं दध्योदनं हितम् ॥"

इति वैद्यकभैषज्यधन्वन्तरिग्रन्थे गुल्माधिकारे ॥)

चिञ्ची, स्त्री, (चिञ्च + गौरादित्वात् ङीष् ।) गुञ्जा । इति केचित् ॥

चिञ्चाम्लं, क्ली, (चिञ्चा तिन्तिड़ी तद्वत् अम्लं यत्र ।) अम्लशाकः । इति राजनिर्घण्टः ॥

चिञ्चासारः, पुं, (चिञ्चायास्तिन्तिड्याः सार इव सारोऽम्लं यत्र ।) अम्लशाकः । इति राजनिर्घण्टः ॥

चिञ्चोटकः, पुं, (चिञ्चेव अटतीति । अट + ण्वुल् । पृषोदरात् साधुः ।) तृणविशेषः । चेँचको इति चेँचड़ा इति च भाषा ॥ तत्पर्य्यायः । अङ्कलोद्यः २ । इति रत्नमाला ॥ चिञ्चाटकोऽपि पाठः ॥

चिट, प्रेषे । इति कविकल्पद्रुमः ॥ (भ्वा-पर-सक-सेट् ।) चेटति भृत्यं स्वामी । इति दुर्गादासः ॥

चिट, क प्रेषे । इति कविकल्पद्रुमः ॥ (चुरा-पर-सक-सेट् ॥)

चित, ई ज्ञाने । इति कविकल्पद्रुमः ॥ (भ्वा-पर-सक-सेट् ।) ई, चित्तः । ज्ञानमिह जागरणम् । ज्ञानञ्च अविद्यानिद्राक्रान्ते जगत्येकः स चेततीति हलायुधः । चिचेत रामस्तत् कृच्छ्रम् । इति दुर्गादासः ॥

चित, इ क स्मृतौ । इति कविकल्पद्रुमः ॥ (भ्वा-पर-सक-सेट् ।) इ क, चिन्तयति विश्वं सुधीः । इति दुर्गादासः ॥

चित, क ङ ज्ञाने । इति कविकल्पद्रुमः ॥ (चुरा-आत्म-सक-सेट् ।) क ङ, चेतयते । राक्षसस्य चेतयन्ति न । इति भट्टौ गणकृतानित्यत्वमिति रमानाथः । वस्तुतस्तु चेतयते ततश्चेतं करोतीति णौ साध्यम् । इति दुर्गादासः ॥

चित्, स्त्री, (चित् संज्ञाने + सम्पदादित्वात् भावे क्विप् ।) ज्ञानम् । इत्यमरः । १ । ५ । १ ॥ (यथा, भागवते । ३ । ७ । २ ।

"ब्रह्मन् कथं भगवतश्चिन्मात्रस्याविकारिणः ।
लीलया चापि युज्येरन् निर्गुणस्य गुणाः क्रियाः ॥")

चित्, व्य, असाकल्यम् । इत्यमरः ॥ यथा । किञ्चित् कश्चित् इत्यादि ॥ (तत्तु प्रत्ययविशेषः । कालाद्यनिर्णये चित्प्रत्ययस्य प्रयोगो दृश्यते । "किमः क्वन्ताचिचनौ ।" इति मुग्धबोधव्याकरणप्रणेता पूज्यपादवोपदेवाचार्य्यः ॥ )

चितः, त्रि, (चि + कर्म्मणि क्तः ।) छन्नः । इति मेदिनी । ते, १८ ॥ (कृतचयनः । सञ्चितः । "इह वै कर्म्मचितो लोकः क्षीयते एवममुत्र पुण्यचितः क्षीयते ।" इति श्रुतिः ॥)

चिता, स्त्री, (चीयते श्मशानाग्निरस्यां यद्वा चीयते उद्धीयतेऽसौ प्रेतस्य परलोकधर्म्मेणेति इति । चि + अधिकरणे वा कर्म्मणि क्तस्ततष्टाप् ।) शवदाहाधारचुल्ली । तत्पर्य्यायः । चित्या २ । इत्यमरः । २।८।११७ ॥ काष्ठमठी ३ चैत्यम् ४ चिताचूड़कम् ५ चित्यम् ६ । इति त्रिकाण्डशेषः ॥ चितिः ७ । (यथा, महाभारते । ३ । २१९ । १७ ।

"चितायैरुद्वहन्माल्यं पश्चाभ्यां तत् प्रवर्त्तते ॥")

संहतिः । इति मेदिनी । ते, १८ ॥

चिताचड़कं, क्ली, (चितेव चूड़कम् ।) चिता । इति त्रिकाण्डशेषः ॥

चितिः, स्त्री, (चीयतेऽस्यामग्निरिति । चि + अधिकरणे क्तिः ।) चिता । (यथा, भागवते ।४।२८।५० ।

"चितिं दारुमयीं चित्वा तस्यां पत्युः कलेवरम् ॥")

समूहः । इति मेदिनी । ते, १८ ॥ दुर्गा । यथा,

"चितिश्चैतन्यभावाद्वा चेतना वा चितिः स्मृता ।
महान् व्याप्य स्थिता सर्व्वं महा वा प्रकृतिर्म्मता ॥"

इति देवीपुराणे ४५ अध्यायः ॥ * ॥

भित्तिस्थेष्टिकादिसङ्ख्याज्ञानार्थाङ्कविशेषः । यथा, चितौ करणसूत्रं सार्द्धवृत्तम् ।

"उच्छ्रयेण गुणितं चितेः किल
क्षेत्रसम्भवफलं घनं भवेत् ।
इष्टिकाघनहृते घने चिते-
रिष्टिकापरिमितिश्च लभ्यते ॥
इष्टकोच्छ्रयहृदुच्छ्रितिश्चितेः
स्युः स्तराश्च दृषदां चितेरपि ॥

उदाहरणम् ।

अष्टादशाङ्गुलं दैर्घ्यं विस्तारो द्वादशाङ्गुलः ।
उच्छ्रितिस्त्र्यङ्गुला यासामिष्टिकास्ताश्चितौ किल ॥
यद्विस्तृतिः पञ्चकराष्टहस्तं
दैर्घ्यञ्च यस्यां त्रिकरोच्छ्रितिश्च ।
तस्यां चितौ किं फलमिष्टिकानां
सङ्ख्या च का ब्रूहि कतिस्तराश्च ॥




इष्टिकायाः घनहस्तमानम् $\frac{३}{६४}$ चितेः क्षेत्रफलम् ४० । उच्छ्रयेण गुणितं चितेर्घनफलम् १२० । लब्धा इष्टिकासङ्ख्या २५६० । स्तरसङ्ख्या २४ । एवं पाषाणचयेऽपि । इति चितिव्यवहारः ॥"

इति लीलावती ॥ (दशाङ्गविशेषः । यथा, मार्कण्डेये । २२ । ६ ।

"चितयस्तत्र कर्त्तव्या नान्तरिक्षगता यतः ॥")

चितिका, स्त्री, (चितिः काञ्चीभेदः सा इव कायतीति । कै + कः ।) कटिशृङ्खला । इति हारावली । २२४ ॥

चित्तं, क्ली, (चेतत्यनेनेति । चित् + करणे क्तः ।) अनुसन्धानात्मिकान्तःकरणवृत्तिः । इति वेदान्तः ॥

"यत्तत् सत्त्वगुणं स्वच्छं शान्तं भगवतः पदम् ।
यदाहुर्वासुदेवाख्यं चित्तं तन्महदात्मकम् ॥
स्वच्छत्वमविकारित्वं शान्तत्वमिति चेतसः ।
वृत्तिलक्षणं प्रोक्तं यथापां प्रकृतिः परा ॥"

इति श्रीभागवतम् ॥

अस्यार्थः । "अधिभूतस्वरूपेण तस्यैव महानितिसंज्ञा अध्यात्मरूपेण चित्तं उपास्यरूपेण वासुदेवः अधिष्ठाता तु तस्य क्षेत्रज्ञः ।" इति श्रीधरस्वामी ॥ (अनेनैव चित्तवृत्तेः प्रथमसम्बन्धः । अतएव भगवत्पतञ्जलिपादैरुपदिष्टं प्रथमसूत्रे "योगश्चित्तवृत्तिनिरोधः ।" तथा च मुण्डकोपनिषदि । ३ । १ । ९ ।

"एषोऽणुरात्मा चेतसा वेदितव्यो
यस्मिन् प्राणः पञ्चधा संविवेश ।
प्राणैश्चित्तं सर्व्वमोतं प्रजानां
यस्मिन् विशुद्धे विभवत्येष आत्मा ॥" )

मनः । इत्यमरः । १ । ४ । ३१ ॥

चित्तप्रसन्नता, स्त्री, (चित्तस्य प्रसन्नता प्रसादः ।) हर्षः । इति हेमचन्द्रः । २ । २२९ ॥

चित्तविप्लवः, पुं, (चित्तस्य विप्लवो विपर्य्ययः ।) उन्मादः । इति हेमचन्द्रः । २ । २३४ ॥

चित्तविभ्रमः, पुं, (चित्तस्य विभ्रमः भ्रान्तिः ।) उन्मादः । इत्यमरः । १ । ७ । २९ ॥ (उन्मादशब्दे विवृतिरस्य ज्ञेया ॥)

चित्तसमुन्नतिः, स्त्री, (चित्तस्य समुन्नतिः समुन्नयनं उत्तोलनमिति यावत् ।) मानः । इत्यमरः । १ । ७ । २२ ॥